- वक्रतुंड महाकाय सूर्य कोटि समप्रभ ।
  निर्विघ्नं कुरुमे देव सर्व कार्येषु सर्वदा ॥ ॥१५॥

- १ से ४ तक में जिस देवता की मूर्ति स्थापित करनी हो प्रतिज्ञा संकल्प में उसे पढ़े शेष छोड़ दे।
- ५ संकल्प में (अमुक-अमुक) लिखा गया है यहाँ पर जिस देव की प्रतिष्ठा हो उसका नाम जोड़ ले।
- चर प्रतिष्ठा। स्थिर प्रतिष्ठा में जैसी प्रतिष्ठा हो एक पढ़े।

- **संकल्प** **ॐ विष्णुर्विष्णुर्विष्णु:, ॐ श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणोऽह्नि द्वितीये परार्धे श्री श्वेत-वाराहकल्पे वैवस्वत-मन्वन्तरे, अष्टाविंशति-तमे युगे कलियुगे, कलि-प्रथम चरणे भारतवर्षे जम्बूद्वीपे भरतखण्डे आर्यावर्तान्तर्गत ब्रह्मावर्तैक-देशे अमुकक्षेत्रे, अमुकदेशे, अमुकनाम्नि नगरे वा ग्रामे, अमुक-शके, बौद्धावतारे, अस्मिन्वर्तमाने, अमुक नाम संवत्सरे, अमुकायने-सूर्ये, अमुक-ऋतौ, महामांगल्यप्रदे अमुक-मासे, अमुक-पक्षे, अमुक-तिथौ, अमुक-वासरे, अमुक-नक्षत्र, यथा राशि-स्थिते-सूर्ये, यथा-यथा राशि-स्थितेषु-शेषेषु ग्रहेषु सत्सु, यथा-लग्न-मुहूर्त-योग-करणान्वितायाम् एवं ग्रह-गुण-विशेषण विशिष्टायां शुभ पुष्प तिथौ श्रुति-स्मृति-पुराणोक्त फल प्राप्तिकाम:, अमुक-गोत्र:, अमुक-नामाऽहम् स्वकीय जन्म-लग्नतो वा दु:स्थानगत ग्रह-जन्य सकलारिष्ट निवृत्यर्थम्, उत्पन्न-उत्पत्स्यमान-अखिलारिष्ट निवृत्तये-दीर्घायुष्यसतत् आरोग्यता प्राप्तये, धन-धान्य समृद्ध्यर्थम् च कायिक-वाचिक-मानसिक-सांसर्गिक चतुर्विध पुरुषार्थ प्राप्त्यर्थम् च धन-धान्य-पुत्र-पौत्रादि अनवच्छिन्न सत्संगति-लाभार्थम्, शत्रु-पराजय, बहु-कीर्त्यादि अनेकानेक अभ्युदय फल प्राप्त्यर्थम् यथा कालाधिवासन पक्षेण....**

१. **सप्रासाद सवृष शिवादि पंचायतन-देवानां स्थिर प्रतिष्ठा सहित मचल लिंग प्रतिष्ठां करिष्ये।**
२. **अनयो: राधाकृष्ण मूर्त्यो: देव-कला सान्निध्यार्थम् सप्रासाद श्रीकृष्ण राधिका मूर्त्यो: प्रतिष्ठां करिष्ये।**
३. **आसु श्रीरामचन्द्र जानकी लक्ष्मण, भरत, शत्रुघ्न, मारुति मूर्त्तिषु देव-कला सान्निध्यार्थम् श्रीरामचन्द्रादि मूर्तीनां प्रतिष्ठां करिष्ये।**
४. **आसु लक्ष्मीनारायण आदि मूर्त्तिषु देव-कला सान्निध्यार्थम् लक्ष्मीनारायणादि प्रतिष्ठां करिष्ये।**
५. **आसु अमुक-अमुक मूर्त्तिषु देव-कला सान्निध्यार्थम् अमुक मूर्तीनां चर प्रतिष्ठां (स्थिर प्रतिष्ठाम्) यथाकाले करिष्ये।**

- **तदंगत्वेन स्वस्ति, पुण्याहवाचनं, मातृकादिपूजनं, ग्रहपूजनं, नांदी श्राद्धादिकं तथा चान्यान्यदेवानां पूजनं करिष्ये**
- तत्रादौ निर्विघ्नता सिद्ध्यर्थम् गणेशाम्बिकयो: पूजनं करिष्ये।

- पृथ्वी ध्यानम्

ॐ पृथिव त्वया धृता लोका देवि त्वं विष्णुना धृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

- ॐ मही द्यौः पृथिवी च न इमं यज्ञ मिमिक्षताम्। पिपृतान्नो भरीमभिः॥

- रक्षा विधानम्

अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥

- अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्।
सर्वेषामविरोधेन पूजा कर्म समारभे॥
- यदत्र संस्थितं *भूतं* स्थान माश्रित्य सर्वतः।
स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥
- भूत प्रेत पिशाचाद्या अपक्रामन्तु राक्षसाः।
स्थानादस्माद् व्रजन्त्यन्यत्स्वी करोमि भुवं त्विमाम्॥
- भूतानि राक्षसा वापि येत्र तिष्ठन्ति केचन।
ते सर्व प्यपगच्छन्तु देव पूजां करोम्यहम्॥

- दिप ध्यानम्

दीपज्योतिः परब्रह्मः दीपज्योतिः जनार्दनः।
दीपोहरतिमे पापं दीपज्योतिर् नामोस्तुते॥

- शुभं करोतु कल्याणं आरोग्यं सुख सम्पदाम्।
मम बुद्धि विकाशाय दीपज्योतिर्नमोस्तुते॥
- साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहं॥
- भो दीप देव रूपस्त्वं कर्म साक्षी ह्यबिघ्नकृत्।
यावत्कर्म समाप्तिः स्यात तावत्वं सुस्थिरो भव॥
- ॐ अग्निर्ज्योतिषा ज्योतिष्मान् रुक्मो वर्चसा वर्चस्वान्।
सहस्रदा ऽ असि सहस्राय त्वा॥

- सूर्य ध्यानम्

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च।
हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्॥

- शंख ध्यानम्

ॐ पांचजन्याय विद्महे पावमानाय धीमहि। तन्नो शंखः प्रचोदयात्॥

- त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करें।
निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोस्तुते॥

- घंटी ध्यानम्

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम्।
घण्टा नाद प्रकुर्वीत पश्चात् घण्टां प्रपूजयेत॥

॥ गौरी - गणपति पूजन ॥

- **गणेश-आवाहनम्** **ॐ गणानां त्वा गणपति ७ हवामहे, प्रियाणान्त्वा प्रियपति ७ हवामहे, निधीनान्त्वा निधिपति ७ हवामहे, वसो: मम आहमजानि गर्भधम् मात्वमजासि गर्भधम् ॥**
  - **गजाननम्भूत गणादि सेवितं कपित्थ जम्बू फलचारु भक्षणम् । उमासुतं शोक विनाश कारकं नमामि विघ्नेश्वरपादपंकजम् ॥**
  - ॐ भूर्भुव: स्व: सिद्धि-बुद्धि सहिताय गणपतये नम: । गणपतिम् आ०, स्था०, पू०।
- **गौरी-आवाहनम्** **ॐ अम्बे अम्बिके अम्बालिके नमानयति कश्चन । ससत्स्यश्वक: सुभद्रिकां काम्पीलवासिनीम् ॥**
  - **ॐ हेमद्रितनायां देवीं वरदां शंकरप्रियां । लम्बोदरस्य जननीं गौरीं आवाह्याम्यहम् ॥**
  - ॐ भूर्भुव: स्व: गौर्यै नम: । गौरीम् आवाहयामि, स्थापयामि, पूजयामि ।
- **प्राणप्रतिष्ठा** **ॐ मनो जूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ७ समिमं दधातु । विश्वे देवास सऽइह मादयन्तामोम्प्रतिष्ठ ॥**
  - **अस्यै प्राणा: प्रतिष्ठंतु अस्यै प्राणा: क्षरन्तु च । अस्यै देवत्वम् आचार्यै मामहेति च कश्चन ॥**
  - ॐ भूर्भुव:स्व: गणेशाम्बिके सुप्रतिष्ठिते वरदे भवतम् ।
- **पूजनम्** पुरु-सूक्त मंत्रो से पंचोपचार या षोडशोपचार पूजन करें । पृष्ठ क्र. 49 देखें । आसन, पाद्य, अर्घ्य, आचमनीयं, स्नानीयं, पंचामृतं, शुद्धोदकं, अभिषेक, वस्त्रं, गंधं, अक्षतं, पुष्पं-पमष्पमालां, नानापरिमलं, सुगन्धित द्रव्यं (इत्रं), धूपं, दीपं, नैवेद्यं, ताम्बूलं, दक्षिणा, नीराजंनम्, प्रदक्षिणा, मंत्र-पुष्पाञ्जलिम् ।
  - मातृकाओं पर यज्ञोपवित न चढ़ावें तथा विशेषार्घ्य न दें ।
- **अभिषेक स्नानम्** गणेशजी का अथर्वशीर्ष या अन्य गणेश स्तोत्रों से अभिषेक करें ।

॥ संकटनाशन गणेश स्तोत्रम् ॥

- **नारद उवाच** **प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् । भक्तावासं स्मरेन्नित्यमायु: कामार्थ सिद्धये ॥** ॥ १ ॥
  - **प्रथमं वक्रतुंण्डं च एकदन्तं द्वितीयकम् । तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्थकम् ॥** ॥ २ ॥

- लम्बोदरं पंचमं च षष्ठं विकटमेव च।
  सप्तमं विघ्नराजं च धूम्रवर्णं तथाष्टमम्॥ ॥ ३ ॥
- नवमं भालचन्द्रं च दशमं तु गजाननम्।
  एकादशं गणपतिं द्वादशं तु गजाननम्॥ ॥ ४ ॥
- द्वादशैतानि नामामि त्रिसन्ध्यं य: पठेन्नर:।
  न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभो॥ ॥ ५ ॥
- विद्यार्थी लभते विद्यां, धनार्थी लभते धनम्।
  पुत्रार्थी लभते पुत्रान्मोक्षार्थी लभते गतिम्॥ ॥ ६ ॥
- जपेद गणपतिस्तोत्रं षडभिर्मासै: फलं लभेत्।
  संवत्सरेण सिद्धिं च लभते नात्र संशय:॥ ॥ ७ ॥
- अष्टभ्यो ब्राह्मणेभ्यश्च लिखित्वा य: समर्पयेत।
  तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादत:॥ ॥ ८ ॥

॥ इति श्रीनारद-पुराणे श्रीसंकट नाशन गणेश स्तोत्रं सम्पूर्णम्॥

॥ गणेश अथर्वशीर्षम्॥

- हरि: ॐ नमस्ते गणपतये। त्वमेव प्रत्यक्षं तत्वमसि। त्वमेव केवलं कर्तासि। त्वमेव केवलं धर्तासि। त्वमेव केवलं हर्तासि। त्वमेव सर्वं खल्विदं ब्रह्मासि। त्व साक्षादात्मासि नित्यम् ॥१॥
- ऋतं वच्मि। सत्यं वच्मि ॥२॥
- अव त्वं माम्। अव वक्तारम्। अव श्रोतारम्। अव दातारम्। अव धातारम्। अवानूचानमव शिष्यम्। अव पश्चात्तात्। अव पुरस्तात्। अवोत्तरात्तात्। अव दक्षिणात्तात्। अव चोर्ध्वात्तात्। अवाधरात्तात्। सर्वतो मां पाहि-पाहि समन्तात् ॥३॥
- त्वं वाङ्मयस् त्वं चिन्मय:। त्वम् आनंदमसयस् त्वं ब्रह्ममय:। त्वं सच्चिदा-नन्दा द्वितीयोऽषि। त्वं प्रत्यक्षं ब्रह्माषि। त्वं ज्ञानमयो विज्ञान-मयोऽषि ॥४॥
- सर्वं जगदिदं त्वत्तो जायते। सर्वं जगदिदं त्वत्तस्तिष्ठति। सर्वं जगदिदं त्वयि लयमेष्यति। सर्वं जगदिदं त्वयि प्रत्येति। त्वं भूमिरापोऽ नलोऽ निलो नभ:। त्वं चत्वारि वाक्-पदानि ॥५॥
- त्वं गुणत्रयातीत:। त्वम् अवस्थात्रयातीत:। त्वं देहत्रयातीत:। त्वं कालत्रयातीत:। त्वं मूलाधार-स्थितोऽसि नित्यम्। त्वं शक्ति-त्रयात्मक:। त्वां योगिनो ध्यायन्ति नित्यं। त्वं ब्रह्मा, त्वं विष्णुस्, त्वं रूद्रस्, त्वं इंद्रस्, त्वं अग्निस्, त्वं वायुस्, त्वं सूर्यस्, त्वं चंद्रमास्, त्वं ब्रह्म भूर्भुव: स्वरोम् ॥६॥

- **गणादिन्-पूर्व-मुच्चार्य वर्णादींस्-तदनन्तरम् । अनुस्वार: परतर: । अर्धेन्दु-लसितम् । तारेण रुद्धम् । एतत्तव मनुस्व-रूपम् । गकार: पूर्व-रूपम् । अकारो मध्यम-रूपम् । अनुस्वारश्चान्त्य-रूपम् । बिन्दुत्तर-रूपम् । नाद: सन्धानम् । स ७ हिता सन्धि: । सैषा गणेश विद्या । गणक ऋषि: । निचृद्-गायत्री-छन्द: । गणपतिर्देवता । ॐ गं गणपतये नम: ॥७॥**
- **एकदन्ताय विद्महे । वक्रतुण्डाय धीमहि । तन्नो दन्ती: प्रचोदयात् ॥८॥**
- **एकदन्तं चतुर्हस्तं पाश-मंकुश-धारिणम् । रदं च वरदं हस्तैर्बिभ्राणं मूषक ध्वजम् । रक्तं लम्बोदरं शूर्प कर्णकं रक्तवाससम् । रक्तगन्धाऽनु लिप्तागं रक्तपुष्पै: सुपुजितम् । भक्तानुकम्पिनं देवं जगत्-कारण मच्युतम् । आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् । एवं ध्यायति यो नित्यं स योगी योगिनां वर: ॥९॥**
- **नमो व्रातपतये । नमो गणपतये । नम: प्रमथपतये । नमस्तेऽस्तु लम्बोदरायैकदन्ताय । विघ्ननाशिने शिवसुताय । श्रीवरदमूर्तये नमो नम: ॥१०॥**

- विशेषार्घ्य — एक ताम्रपात्र में जल, चन्दन, अक्षत, फल, फूल, दूर्वा और दक्षिणा रखलें ।
  - **रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्य रक्षक ।**
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥
  - **द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।**
वरदस्त्वं वरं देहि वांछितं वांछितार्थद ॥
  - **अनेन सफलार्घ्येण वरदोऽस्तु सदा मम ।**
  - गणेशाम्बिकाभ्यां नमः विशेषार्घ्यं समर्पयामि ।
- प्रार्थना — **विघ्नेश्वराय वरदाय सुरप्रियाय, लम्बोदराय सकलाय जगद्धिताय ।**
नागाननाय श्रुतियज्ञविभूषिताय, गौरीसुताय गणनाथ नमो नमस्ते ॥
  - **त्वं वैष्णवी शक्तिरनन्तवीर्या, विश्वस्य बीजं परमासि माया ।**
सम्मोहितं देवि समस्तमेतत्, त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥
  - गणेशाम्बिकाभ्यां नमः । प्रार्थनापूर्वकं नमस्कारान् समर्पयामि ।
- अर्पण — अनया पूजया गणेशाम्बिके प्रीयेताम्, न मम ।

॥ कलश स्थापनम् ॥

- भूमि स्पर्श — ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री।
  पृथिवीं यच्छ पृथिवीं दृ ७ ह पृथिवीं माहि ७ सीः ॥
- धान्य प्रक्षेप — ॐ ओषधयः समवदन्त, सोमेन सह राज्ञा।
  यस्मै कृणोति ब्राह्मणस्त ७ राजन् पारयामसि ॥
- कलशं स्थापयेत — ॐ आजिघ्र कलशं मह्यात्वा विशन्त्विन्दवः पुनरुर्जा निवर्तस्व सा नः।
  सहस्रन् धुक्ष्वो रुधारा पयस्वतिः पुनर्म्मा विशताद्रयिः॥
- कलशे अक्षत पूरणम् — ॐ इमं में वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके ॥
- जल पूरणम — ॐ वरुणस्योत्तम्भन मसि वरुणस्य स्कम्भ सर्जनीस्त्थो वरुणस्य ऽऋत सदन्यसि। वरुणस्य ऽऋत सदनमसि वरुणस्य ऽऋत सदन मासीद् ॥
- कुश प्रक्षेप — ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥
- गन्ध प्रक्षेप — ॐ त्वां गन्धर्वा ऽअखनँस्त्वामिन्द्रस्त्वाँ बृहस्पतिः।
  त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्च्यत ॥
- सप्तधान्य प्रक्षेप — ॐ धान्यमसि धिनुहि देवान् प्राणायत्वो दानाय त्वा व्यानाय त्वा।
  दीर्घामनु प्रसिति-मायुषे धान्देवो वः सविता हिरण्यपाणिः
  प्रति गृभ्णा-त्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोऽसि ॥
- सर्वौषधी प्रक्षेप — ॐ या ओषधीः पूर्वा जाता देवेब्भ्यस्त्रियुगं पुरा।
  मनैनु बब्भ्रूणावह ७ शतं धामानि सप्त च ॥
- दूर्वा प्रक्षेप — ॐ काण्डात काण्डात्प्ररोहन्ती परुषः परुषस्परि।
  एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥
- पंच-पल्लव प्रक्षेप — ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।
  गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥
- सप्तमृत्तिका प्रक्षेप — ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः ॥
- सुपारी प्रक्षेप — ॐ याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।
  बृहस्पति प्रसूतास्ता नो मुञ्चन्त्व ७ ह सः ॥
- पंचरत्न प्रक्षेप — ॐ परिवाज पतिः कविरग्निर्हव्यान्यक्रमीत्। दधद्रत्नानि दाशुषे ॥

- हिरण्य प्रक्षेप **ॐ हिरण्यगर्भ: समवर्त्तताग्रे भूतस्य जात: पतिरेक ऽआसीत।**
  स दाधार पृथ्वीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥
- कलश में सूत्र लपेटे **ॐ सुजातो ज्योतिषा सह शर्मवरूथमासदत्स्व:।**
  वासोअग्ने विश्वरूप ७ संव्ययस्व विभावसो॥
- कलश पर पूर्णपात्र रखें **ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत।**
  वस्नेव विकृणावहा इषमूर्ज ७ शतक्रतो॥ ऊपर जव भरा प्याला रखे।
  - पूर्णपात्र एक पियाले में जव, अक्षत, पीली सरसो, दही, दूब, मौली।
- कलश पर नारीयल रखें **ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।**
  इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण॥ पूर्णपात्र पर नारियल रखें।
- कलश पर दीपक रखें **ॐ अग्निर्ज्योतिर्ज्योतिरग्नि: स्वाहा सूर्योज्योतिर्ज्योति: सूर्य: स्वाहा।**
  अग्निवर्चो ज्योतिर्वर्च: स्वाहा सूर्योवर्चो ज्योतिर्वर्च: स्वाहा।
  ज्योति: सूर्य: सूर्यो ज्योति: स्वाहा॥
- कलश-आवाहन **ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भि:।**
  अहेडमानो वरुणेह बोध्युरुश ७ समा न आयु: प्र मोषी:॥
  - अस्मिन कलशे वरुणं सांङ्ग सपरिवारं सायुधं सशक्तिकम् आवाह्यामि।
- दाहिने हाथ की अनामिका अंगुलि (जिसमें पवित्री पहिनी है) उससे कलश को छुकर प्रार्थना करे।
- कलश प्रार्थना **कलशस्य मुखे विष्णु: कंठे रुद्र समाश्रिता:।**
  मूलेतस्य स्थितो ब्रह्मा मध्ये मात्र गणा स्मृता:॥
  - **कुक्षौ तु सागरा सर्वे सप्तद्विपा वसुंधरा।**
    ऋग्वेदो यजुर्वेदो सामवेदो अथर्वणा:॥
  - **अङैश्च सहिता सर्वे कलशन्तु समाश्रिता:।**
    अत्र गायत्री सावित्री शान्ति: पुष्टिकरी तथा॥
  - **आयान्तु देवपूजार्थं दुरितक्षयकारका:,**
    गंगे च यमुने चैव गोदावरि सरस्वति।
    नर्मदे सिन्धुकावेरि जलेऽस्मिन संनिधिं कुरु॥
  - ॐ भूभुर्व: स्व: भो वरुण ! इहा-गच्छ, इह-तिष्ठ स्थापयामि, पूजयामि मम पूजां गृहाण, ॐ अपां पतये वरुणाय नम:।
- प्राणप्रतिष्ठा **ॐ मनो जूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ७**
  समिमं दधातु। विश्वे देवास सऽइह मादयन्तामोम्प्रतिष्ठ॥
  - कलशे वरुणाद्यावाहितदेवता:। सुप्रतिष्ठिता वरदा भवन्तु।

- ध्यानम् **ॐ आश्रित्य यं भवति धन्यतरा प्रतीची, रत्नाकरत्वमुपयाति, समूहः।**
  पाशश्च यस्य भवपाशविनाशकारी त पाश धारिणमहं हृदि चिन्तयामि॥
  - ॐ वरुणाद्यावाहितदेवताभ्यो नमः। ध्यानार्थे पुष्पं समर्पयामि।
- आवाहनम् **यद् दृष्टिकोणरहिता वसुधा सदैव, बन्ध्येव भाति विफली कृतबीज शक्तिः।**
  तं वारि वारिणमहं वरुणं सदैव, धराधरं सुखकरं प्रिय माह्यामि॥
  - ॐ वरुणाद्यावाहितदेवताभ्यो नमः। आवाहनार्थे पुष्पं समर्पयामि।
- **पूजनम्** पुरु-सूक्त मंत्रो से पंचोपचार या षोडशोपचार पूजन करें। **पृष्ठ क्र. 49** देखें। आसन, पाद्य, अर्घ्य, आचमनीयं, स्नानीयं, पंचामृतं, शुद्धोदकं, अभिषेक, वस्त्रं, गंधं, कलश चतुर्दिक्षु चतुर्वेदान्पूजयेत् अक्षतं, पुष्पं-पमष्पमालां, नानापरिमलं, सुगन्धित द्रव्यं (इत्रं), धूपं, दीपं, नैवेद्यं, ताम्बूलं, दक्षिणा, नीराजंनम्, प्रदक्षिणा, मंत्र-पुष्पाञ्जलिम्।
- कलश चतुर्दिक्षु चतुर्वेदान्पूजयेत् कलश के चारो तरफ कुंकुम एवं चावल लगा दें

1. पूर्व	**ऋग्वेदाय नमः।**	4. उत्तर	**अथर्वेदाय नमः।**
2. दक्षिण	**यजुर्वेदाय नमः।**	5. कलश के ऊपर	**ॐ अपाम्पतये वरुणाय नमः।**
3. पश्चिम	**सामवेदाय नमः।**		

- प्रार्थना **देव-दानव संवादे मथ्यमाने महोदधौ।**
  उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥
  - **त्वत् तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः।**
    त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥
  - **शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।**
    आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥
  - **त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः।**
    त्वत् प्रसादादिमं कर्म कर्तुमीहे जलोद्भव॥
  - **सांनिध्यं कुरु मे देव प्रसन्नो भव सर्वदा।**
    क्षेमकर्त्ता, तुष्टिकर्त्ता, पुष्टिकर्त्ता, वरदो भव॥
  - **नमो नमस्ते स्फटिक प्रभाय सुश्वेत-हाराय सुमङ्गलाय।**
    सुपाश-हस्ताय झषासनाय जलाधि-नाथाय नमो नमस्ते॥
  - ॐ वरुणाद्यावाहितदेवताभ्यो नमः। प्रार्थनापूर्वकं नमस्कारान् समर्पयामि।
- अर्पण एतानि गन्धाक्षत, पुष्प, धूप, दीप, नैवेद्य, ताम्बूल, पूंगीफल, दक्षिणा, द्रव्येण अनया पूजया वरुणादि आवाहित देवताः प्रीयन्तां न मम।

॥ पुण्याहवाचनम् ॥

- अपने सामने पृथिवी पर रोली या हल्दी से अष्टदल कमल बनाए।
- कमलदल के उपर पुण्याहवाचन के लिए एक मिट्टी, ताँबे या चाँदी का कलश स्थापित करे।
- कलश स्थापन विधि हेतु पृष्ठ क्रं. 42 देखें।

❖ ब्राह्मण वरण

- संकल्प देशकालौ संकीर्त्य अमुक गोत्रो, अमुक शर्मा, अमुक कर्मणि सर्वाभ्युदय प्राप्तये एभिर्ब्राह्मणैः पुण्याहं वाचयिष्ये, तदंगतया ब्राह्मणानां पूजनं वरणं च करिष्ये।
  - **भुमि देवाग्र जन्मासि त्वं विप्र पुरुषोत्तम।**
    प्रत्यक्षो यज्ञपुरुषो ह्यर्णोर्घोयं प्रतिगृह्यताम्॥ ब्राह्मण के हाथ में जल दें।
- ब्राह्मण-वरण **नमोस्त्वनन्ताय सहस्त्र मूर्तये, सहस्त्रपादाक्षि शिरोरु बाहवे।**
  सहस्त्र नाम्ने पुरुषाय शाश्वते, सहस्त्रकोटी युग धरिणे नमः॥
- यजमान एभिर्गन्धाक्षत पुष्प पूंगीफल द्रव्यैः अमुक-देव प्रतिष्ठा कर्मणि सर्वाभ्युदय प्राप्तये पुण्याहवाचनार्थं ब्राह्मणं त्वामहं वृणे।
- ब्राह्मण **वृतोस्मि**
- ब्राह्मण-ध्यान **ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विषीमतः सुरुचोव्वेन आवः।**
  स बुध्न्या उपमाऽ अस्य विष्ठाः शतश्च योनिम शतश्च व्विवः॥ नमस्कार करे
- वरुण-प्रार्थना **ॐ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक।**
  पुण्यावाचनं यावत् तावत् त्वं सुस्थिरो भव॥

- यजमान दोनों पैर का घुटना मोडकर बैठ जाय। दोनों हाँथों को कमल के समान बनाकर पुण्याहवाचन कलश को उठा लें एवं कलश को सिर पर स्पर्श कर ब्राह्मणों से प्रार्थना करें।
  - यजमान **ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च।**
    तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु॥ आशीर्वाद मांगे।
    ब्राह्मण **अस्तु दीर्घमायुः। अस्तु दीर्घमायुः। अस्तु दीर्घमायुः।**
  - यजमान **ॐ त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।**
    तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु इत भवन्तो ब्रुवन्तु॥
    ब्राह्मण **पुण्यं पुण्याहं दीर्घमायुरस्तु।** दो बार सिर से कलश का स्पर्श कर रख दें।
  - यजमान - जल **ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम्।**
    ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु नः॥

- ॐ शिवा आपः सन्तु । — यजमान ब्राह्मणों के हाथों में जल दे ।

ब्राह्मण — सन्तु शिवा आपः ।

- यजमान - पुष्प — लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे ।
सा मे वसतु वै नित्यं सौमनस्यं सदास्तु मे ॥
- सौमनस्यमस्तु । — ब्राह्मणों के हाथ में पुष्प दें ।

ब्राह्मण — अस्तु सौमनस्यम् ।

- यजमान - अक्षत — अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशोबलम् ।
यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥
- अक्षतं चारिष्टं चास्तु । — ब्राह्मणों के हाथ में चावल दें ।

ब्राह्मण — अस्त्वक्षतमरिष्टं चं ।

- यजमान - चंदन — गन्धाः पान्तु । — ब्राह्मणों के हाथ में चन्दन दें ।

ब्राह्मण — सौमङ्गल्यं चास्तु ।

- यजमान - अक्षत — अक्षताः पान्तु । — ब्राह्मणों के हाथ में पुनः चावल दें ।

ब्राह्मण — आयुष्यमस्तु ।

- यजमान - पुष्प — पुष्पाणि पान्तु । — ब्राह्मणों के हाथ में पुष्प दें ।

ब्राह्मण — सौश्रियमस्तु ।

- यजमान - सुपारी — सफलताम्बूलानि पान्तु । — ब्राह्मणों के हाथ में सुपारी-पान दें ।

ब्राह्मण — ऐश्वर्यमस्तु ।

- यजमान - दक्षिणा — दक्षिणाः पान्तु । — ब्राह्मणों के हाथ में दक्षिणा दें ।

ब्राह्मण — बहुदेयं चास्तु ।

- यजमान - जल — आपः पान्तु । — ब्राह्मणों के हाथ में पुनः जल दें ।

ब्राह्मण — स्वर्चितमस्तु ।

- यजमान - प्रार्थना — ॐ दिर्घमायुः शान्तिः पुष्टिः तुष्टिः श्रीर्यशो विद्या विनयो वित्तं
बहुपुत्रं बहुधनं चायुष्यं चास्तु । — हाथ जोड़कर प्रार्थना करे ।

ब्राह्मण — अस्तु । ॐ दीर्घमायुः शान्तिः पुष्टिस्तुष्टिचास्तु ।

- यजमान — यं कृत्वा सर्व वेद यज्ञ क्रिया करण कर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते,
तमहमोङ्कारमादिं कृत्वा यजुराशीर्वचनं बहुऋषिमतं समनुज्ञातं
भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । — अक्षत लेकर

ब्राह्मण — वाच्यताम् ।

- ऐसा कहकर निम्न मन्त्रोंका पाठ करे ....

- ऋग्वेद मंत्रः ॐ द्रविणोदा द्रविण सस्तुरस्य द्रविणोदाः सनस्य प्रयंसत् ।
  द्रविणोदा वीरवती मिषन्नो द्रविणोदा रासते दीर्घमायुः ॥ ॥ १ ॥
  - सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात सविता धरातात् ।
    सविता नः सुवतु सर्वतातिं सविता नां रासतान् दीर्घमायुः ॥ २ ॥
  - नवो नवो भवति जायमानो ऽहान्कोतुरुषसामेत्यग्रम् ।
    भागं देवेभ्यो विद्धात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥ ॥ ३ ॥
  - उच्चा दिवि दक्षिणावन्तो अस्तुर्ये अश्वदाः सह ते सूर्येण ।
    हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्त आयुः ॥ ४ ॥

- यजुर्वेद मंत्रः ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये माक्षभिर्यजत्राः ।
  स्थिरै रङ्गैस्तुष्टुवा ७ सस्तनूभिर् व्यशेमहि देवहितं यदायुः ॥ १ ॥
  - देवानां भद्रा सुमतिर्ऋ जूयतान्देवाना ७ राति रभिनो निवर्तताम् ।
    देवाना ७ सख्यमुपसेदिमा वयन्देवान आयुः प्रतिरन्तु जीवसे ॥२॥
  - दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
    अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ ॥ ३ ॥

- सामवेद मंत्रः ॐ देवो ३ वो द्रविणो दाः पूर्णा विवष्ट्वा सिचम् ।
  ऊद्धा १ सिञ्चा २ । ध्वमुपवापृणध्वम् । आदिद्वोदे २ ।
  व ऊहते । इडा २,३ भा ३,४,३ । ऊं २,३,४,५ इ । डा ॥ ॥ १ ॥
  - अद्यनो देव सवितः । ओ हो वा । इह श्रुधायि । प्रजावा २,३ त्सा ।
    वीः सौभगाम् । परादू २,३ ष्वा ३ । हो वा ३ हा ।
    प्रिय ७ सु २,३,४,५ वा ६,५,६ दक्षा ३ या २,३,४,५ ॥ ॥ २ ॥

- अथर्वेद मंत्रः धाता रातिः सवितेदं जुषन्तां प्रजापतिर् निधिपतिर्नोऽ अग्निः ।
  त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ॥ ॥ १ ॥
  - येन देवं सवितारं पति देवा अधारयन् ।
    तेनेमम् ब्रह्मणस्पते परि राष्ट्राय धत्तन ॥ ॥ २ ॥
  - नवोनवो भवसि जयमानोऽ ह्वां केतुरुषसामेत्यग्रम् ।
    भागं देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरते दीर्घमायुः ॥ ॥ ३ ॥
  - उच्चैर्घोषो दुन्दुभिः सन्त्वनायन् वानस्पत्यः सम्भृत उस्रियाभिः ।
    वाचं क्षुणुवानो दमयन्तसपत्नन्त्सिंह इव जेष्यमभि षंस्तनीहि ॥ ४ ॥

- ब्राह्मण **करोतु स्वस्ति ते ब्रह्मा स्वस्ति चाऽपि द्विजातय: ।**
  सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥ ॥ १ ॥
  - **ययातिर्नहुषश्चैव धुन्धुमारो भगीरथ: ।**
    तुभ्यं राजर्षय: सर्वे स्वस्ति कुर्वन्तु ते सदा ॥ ॥ २ ॥
  - **स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च ।**
    स्वस्त्यस्त्वापादकेभ्यश्च सर्वेभ्य: स्वस्ति ते सदा ॥ ॥ ३ ॥
  - **स्वाहा स्वधा शची चैव स्वस्ति कुर्वंतु ते सदा ।**
    करोतु स्वस्ति वेदादिर्नित्यं तव महामखे ॥ ॥ ४ ॥
  - **लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ ।**
    असितो देवलश्चैव विश्वामित्र स्तथाङ्गिरा: ॥ ॥ ५ ॥
  - **वसिष्ठ: कश्यपश्चैव स्वस्ति कुर्वन्तु ते सदा ।**
    धाता विधाता लोकेशो दिशश्च सदिगीश्वरा: ॥ ॥ ६ ॥
  - **स्वस्ति तेऽद्य प्रयच्छन्तु कार्तिकेयश्च षण्मुख: ।**
    विवस्वान् भगवान् स्वस्ति कतोतु तव सर्वदा ॥ ॥ ७ ॥
  - **दिग्गजाश्चैव चत्वार: क्षितिश्च गगनं ग्रहा:।**
    अधस्ताद् धरणीं चाऽसौ नागो धारयते हि य: ॥
    शेषश्च पन्नग श्रेष्ठ: स्वस्ति तुभ्यं प्रयच्छतु ॥ ॥ ८ ॥

- यजमान **व्रत-जप-नियम-तप: स्वाध्याय क्रतु शम-दम-दया-दान विशिष्टानां सर्वेषां ब्राह्मणानां मन: समाधीयताम् ।**
  ब्राह्मण **समाहितमनस: स्म: ।**

- यजमान **प्रसीदन्तु भवन्त: ।**
  ब्राह्मण **प्रसन्ना: स्म: ।**

- यजमान अपने सामने २ मिट्टी का प्याला (पात्र) रखे । यजमान पुण्याह-वाचन वाले कलश को उठाकर निम्न मंत्रो द्वारा कलश का जल १-१ बूंद क्रमश: पियाले में गिराए । ब्राह्मण बोलते जाय ।

- **प्रथम** (दाहिने) **पात्र** ब्राह्मण हर वचन पर अस्तु कहता रेहे ।

1. **ॐ शान्तिरस्तु ।**
2. **ॐ पुष्टिरस्तु ।**
3. **ॐ तुष्टिरस्तु ।**
4. **ॐ वृद्धिरस्तु ।**
5. **ॐ अविघ्नमस्तु ।**
6. **ॐ आयुष्यमस्तु ।**
7. **ॐ आरोग्यमस्तु ।**
8. **ॐ शिवमस्तु ।**
9. **ॐ शिवं कर्मास्तु ।**
10. **ॐ कर्म समृद्धिरस्तु ।**
11. **ॐ धर्म समृद्धिरस्तु ।**
12. **ॐ वेद समृद्धिरस्तु ।**
13. **ॐ शास्त्र समृद्धिरस्तु ।**
14. **ॐ धनधान्य समृद्धिरस्तु ।**
15. **ॐ पुत्रपौत्र समृद्धिरस्तु ।**
16. **ॐ इष्ट सम्पदस्तु ।**

- **द्वितीय** (बाएं) **पात्र** ॐ अरिष्ट निरसन मस्तु।
ॐ यत्पापं रोगोऽ शुभम कल्याणं तद् दूरे प्रतिहतमस्तु।

- **प्रथम** (दाहिने) **पात्र**

1. ॐ यच्छ्रेयस्तदस्तु।
2. ॐ उत्तरे कर्मणि निर्विघ्नमस्तु।
3. ॐ उत्तरोत्तर महरहरभि वृद्धिरस्तु।
4. ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम्।
5. ॐ तिथि करण मुहुर्त नक्षत्र ग्रह सम्पदस्तु।
6. ॐ तिथि करण मुहुर्त नक्षत्र ग्रह लग्नादि देवताः प्रीयन्ताम्।
7. ॐ तिथि करणे समुहुर्त सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम्।
8. ॐ दुर्गा पांचाल्यौ प्रीयेताम्।
9. ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्।
10. ॐ इंद्रपुरोगा मरुद्गणाः प्रीयन्ताम्।
11. ॐ वसिष्ठ पुरोगा ऋषिगणाः प्रीयन्ताम्।
12. ॐ माहेश्वरी पुरोगा उमा मातरः प्रीयन्ताम्।
13. ॐ अरुन्धति पुरोगा एकपत्न्यः प्रीयन्ताम्।
14. ॐ ब्रह्म पुरोगा सर्वे वेदाः प्रीयन्ताम्।
15. ॐ विष्णु पुरोगा सर्वे देवाः प्रीयन्ताम्।
16. ॐ ऋषय श्छंदास्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम्।
17. ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम्।
18. ॐ श्रीसरस्वत्यौ प्रीयेताम्।
19. ॐ श्रद्धामेधे प्रीयेताम्।
20. ॐ भगवती कात्यायनी प्रीयेताम्।
21. ॐ भगवती माहेश्वरी प्रीयेताम्।
22. ॐ भगवती पुष्टिकरी प्रीयेताम्।
23. ॐ भगवती तुष्टिकरी प्रीयताम्।
24. ॐ भगवती ऋद्धिकरी प्रीयेताम्।
25. ॐ भगवती वृद्धिकरी प्रीयेताम्।
26. ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्।
27. ॐ सर्वा:कुलदेवताः प्रीयन्ताम्।
28. ॐ सर्वा ग्रामदेवताः प्रीयन्ताम्।
29. ॐ सर्वा इष्टदेवताः प्रीयन्ताम्।

- **द्वितीय** (बाएं) **पात्र**

1. ॐ हताश्च ब्रह्मद्विषः।
2. ॐ हताश्च परिपन्थिनः।
3. ॐ हताश्च विघ्नकर्तारः।
4. ॐ शत्रवः पराभवं यान्तु।
5. ॐ शाम्यन्तु घोराणि।
6. ॐ शाम्यन्तु पापानि।
7. ॐ शाम्यन्त्वीतयः।
8. ॐ शाम्यन्तूपद्रवाः।

- **प्रथम** (दाहिने) **पात्र**

1. ॐ शुभानि वर्धन्ताम्।
2. ॐ शिवा आपः सन्तु।
3. ॐ शिवा ऋतवः सन्तु।
4. ॐ शिवा अग्नयः सन्तु।
5. ॐ शिवा आहुतयः संतु।
6. ॐ शिवा ओषधयः सन्तु।
7. ॐ शिवा वनस्पतयः संतु।
8. ॐ शिवा अतिथयः संतु।
9. ॐ अहोरात्रे शिवे स्त्याताम्।

- **यजुर्वेदः** ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः
पच्यन्तां योगक्षेमो नः कल्पताम्॥

- यजमान

1. ॐ शुक्रांगारक-बुध-बृहस्पति-शनैश्चर-राहु-केतु-सोम सहिता आदित्य पुरोगा सर्वे ग्रहाः प्रीयंताम्।
2. ॐ भगवान पर्जन्यः प्रीयताम्।
3. ॐ भगवान् नारायणः प्रीयताम्।
4. ॐ भगवान स्वामी महासेनः प्रीयताम्। ॐ पुरोऽनुवाक्यया यत्पुण्यं तदस्तु।
5. ॐ याज्यया यत्पुण्यं तदस्तु।
6. ॐ वषट्कारेण यत्पुण्यं तदस्तु।
7. ॐ प्रातः सूर्योदये यत्पुण्यं तदस्तु।

- यजमान कलश को अपनी जगह पृथिवी पर रख कर हाथ जोड़कर ब्राह्मणों से प्रार्थना करे –

  - यजमान — ॐ एतत् कल्याण युक्तं पुण्यं पुण्याहं वाचयिष्ये।

    ब्राह्मण — वाच्यताम्।

  - यजमान-पुण्याहं — ॐ ब्राह्म्यं पुण्यं महर्यच्च सृष्टि-उत्पादन कारकम्।
    वेद वृक्षोद्भवं नित्यं तत् पुण्याहं ब्रुवन्तु नः ॥
    - भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य देवप्रतिष्ठा कर्मणः पुण्याहं भवन्तो ब्रुवन्तु।

    ब्राह्मण — ॐ पुण्याहम्। ॐ पुण्याहम्। ॐ पुण्याहम्।
    - ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
      पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ यजुः

  - यजमान-कल्याणं — ॐ पृथिव्या मुद्धृतायां तु यत्कल्याणं पुरा कृतम्।
    ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥
    - भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य देवप्रतिष्ठा कर्मणः कल्याणं भवन्तो ब्रुवन्तु।

    ब्राह्मण — ॐ कल्याणम्। ॐ कल्याणम्। ॐ कल्याणम्।
    - ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्या ७ शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुप मादो नमतु।

  - यजमान-ऋद्धिं — ॐ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृताः।
    सम्पूर्णा सुप्रभावा च तामृद्धिं प्रबुवन्तु नः ॥
    - भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य देवप्रतिष्ठा कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु।

    ब्राह्मण — ॐ कर्म ऋद्ध्यताम्। ॐ कर्म ऋद्ध्यताम्। ॐ कर्म ऋद्ध्यताम्।
    - ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम।
      दिवं पृथिव्या अध्याऽरुहामाविदाम देवान्त्स्वर्ज्योतिः ॥

  - यजमान-स्वस्ति — ॐ स्वस्तिस्तु याऽविनाशाख्या पुण्य कल्याण वृद्धिदा।
    विनायक प्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥
    - भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य देवप्रतिष्ठा कर्मणे स्वस्ति भवन्तो ब्रुवन्तु।

ब्राह्मण — ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति।
ॐ स्वस्ति न इन्द्रो वृद्ध श्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥

- यजमान-श्री — ॐ समुद्रमथनाज् जाता जगदानन्द कारिका।
हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः॥
  - भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य देवप्रतिष्ठा कर्मणः श्रीरस्तु इति भवन्तो ब्रुवन्तु।

ब्राह्मण — ॐ अस्तु श्रीः। ॐ अस्तु श्रीः। ॐ अस्तु श्रीः।
  - ॐ श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणा मुम्मऽइषाण सर्वलोकं मऽइषाण॥

- यजमान — ॐ मृकण्डु सूनोरायुर्यद् ध्रुवलोमशयोस्तथा।
आयुषा तेन संयुक्ता जीवेम शरदः शतम्॥

ब्राह्मण — ॐ शतं जीवन्तु भवन्तः। ॐ शतं जीवन्तु भवन्तः। ॐ शतं जीवन्तु भवन्तः।
  - ॐ शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसन् तनूनाम्। पुत्रासो
यत्र पितरो भवन्ति मानो मध्या री रिषतायुर्गन्तोः॥

- यजमान — ॐ शिव गौरी विवाहे या या श्रीरामे नृपात्मजे।
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि॥

ब्राह्मण — ॐ अस्तु श्रीः। ॐ अस्तु श्रीः। ॐ अस्तु श्रीः।
  - ॐ मनसः काम माकूतिं वाचः सत्यमशीय।
पशूना ७ रूपमन्नस्य रसो यशः श्रीः श्रयताम् मयि स्वाहा॥

- यजमान — प्रजापतिर्लोकपालो धाता ब्रह्मा च देवराट्।
भगवाञ्छाश्वतो नित्यं नो वै रक्षतु सर्वतः॥

ब्राह्मण — ॐ भगवान् प्रजापतिः प्रीयताम्। ॐ भ.प्र.प्री.। ॐ भ.प्र.प्री.।
  - ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्त्वय ममुष्य पिता सावस्य
पिता व्यय ७ स्याम पतयो रयीणाम् ७ स्वाहा॥

- यजमान — आयुष्मते स्वस्तिमते यजमानाय दाशुषे।
श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः॥

ब्राह्मण — ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति। ॐ आयुष्मते स्वस्ति।
  - ॐ प्रति पन्था मपद्महि स्वस्तिगामनेहसम्।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु॥ ॐ पुण्याहवाचन समृद्धिरस्तु॥

- यजमान ॐ अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिरुप विष्ट ब्राह्मणानां वचनात् श्रीमहागणपति प्रसादाच्च परिपूर्णोऽस्तु।

  ब्राह्मण **ॐ अस्तु परिपूर्णः।**

- द्वितीय (बाएं) पात्र में जो जल गिराया है उस नाई या किसी नौकर से बाहर फिंकवा दे।

- प्रथम (दीहिने) पात्र के जल से ४ ब्राह्मण यजमान और यजमान पत्नी को वाम (बायीं) भाग में बैठाकर तथा सकुटुम्ब को दूर्वा या आम्रपल्लवों से अभिषेक करें, एवं बचे जल को घर में चारों तरफ छिड़क दे।

- अभिषेक : **द्यौः शान्तिरन्तरिक्ष ७ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्व ७ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि॥**
  - **ॐ सुरास्त्वामभषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः।**
    वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः॥ ॥ १ ॥
  - **प्रद्युम्नश्चा निरुद्धश्च भवन्तु विजयाय ते।**
    आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा॥ ॥ २ ॥
  - **वरुणः पवनश्चैव धनाध्यक्षस्तथा विभुः।**
    ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा॥ ॥ ३ ॥
  - **कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।**
    बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः॥ ॥ ४ ॥
  - **एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः।**
    आदित्यश्चन्द्रमा भौमो बुध जीव सितार्क जाः॥ ॥ ५ ॥
  - **ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च देवताः।**
    देव दानव गन्धर्वाः यक्ष राक्षस पन्नगाः॥ ॥ ६ ॥
  - **ऋषयो मनवो गावो देवमातर एव च।**
    देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः॥ ॥ ७ ॥
  - **अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।**
    औषधानि च रत्नानि कालस्यावयवाश्च ये॥ ॥ ८ ॥
  - **सरितः सागराः शैलास्तीर्थानि जलदा नदाः।**
    एते त्वामभिषिञ्चन्तु धर्म कामार्थ सिद्धये॥ ॥ ९ ॥

- दक्षिणा संकल्प ॐ अद्य शुभ-पुण्य-तिथौ अमुक-गोत्रः, अमुक-नामाऽहम् अस्य कृतस्य पुण्याह वाचन कर्मणः तत्सम्पूर्ण फल-प्राप्त्यर्थंम् मनोसद्दिष्टां दक्षिणां दातु मह मुत्सृजे।
- ब्राह्मण **ॐ स्वस्ति।**
- अर्पण ॐ पुण्याहवाचनेन कर्मांग देवताः प्रीयन्ताम्।

॥ षोडश मातृका पूजनम् (अग्निकोण) ॥

आत्मनः कुलदेवता 16	लोकमातरः 12	देव सेना 8	मेधा 4
तुष्टिः 15	मातरः 11	जया 7	शची 3
पुष्टिः 14	स्वाहा 10	विजया 6	पद्मा 2
धृतिः 13	स्वधा 9	सावित्री 5	गणेश + गौरी 1

ॐ अम्बे अम्बिके अम्बालिके नमानयति कश्चन ।
ससत्स्यश्वकः सुभद्रिकां काम्पीलवासिनीं ॥
गौरी पद्मा शची मेधा, सावित्री विजया जया ।
देवसेना स्वधा स्वाहा, मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिः, आत्मनः कुलदेवता ।
गणेशेनाधिका ह्येता, वृद्धौ पूज्याश्च षोडश ॥

1. गणेश गौरी
2. पद्मा
3. शची
4. मेधा
5. सावित्री
6. विजया
7. जया
8. देव सेना
9. स्वधा
10. स्वाहा
11. मातरः
12. लोकमातरः
13. धृतिः
14. पुष्टिः
15. तुष्टिः
16. आत्मनः कुल देवताः

1. **गणेशम्**

ॐ गणानांत्वा गणपति ও हवामहे, प्रियाणां त्वा प्रियपति ও हवामहे,
निधीनां त्वा निधिपति ও हवामहे ।
वसो: मम आहमजानि गर्भधम् त्वमजासि गर्भधम् ॥

- **ॐ समिपे मातृवर्गस्य सर्वविघ्न हरं सदा ।**
त्रैलोक्य पूजितं देवं गणेशं स्थापयाम्यहम् ॥
- ॐ भुर्भुवः स्वः गणपतये नमः । गणपतिम् आवाह्यामि स्थापयामि पूजयामि ।

1. **गौरीम्**

ॐ आयं गौः पृश्नीरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः ॥

- **हिमाद्रि तनयां देविं वरदां दिव्य शंकरप्रियाम् ।**
लंबोदरस्य जननीं गौरिं आवाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः गोर्यै नमः । गौरीम् आवाह्यामि स्थापयामि पूजयामि ।

2. **पद्माम्**

ॐ हिरण्यरूपा उषयो विरोक उभाविन्द्रा उदिथः सूर्यश्च ।
अरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिञ्च मित्रोसिवरुणोसि ॥

- **सुवर्णाभांपद्महस्तांविष्णो र्वक्षस्थल स्थितां ।**
त्र्यैलोक्य पूजितां देंविं पद्मां आवाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः पद्मायै नमः । पद्माम् आवाह्यामि स्थापयामि पूजयामि ।

3. **शचीम्**

ॐ निवेशनः संगमनो वसूनां विश्वा रुपाभिचष्टे शचीभिः ।
देव इव सविता सत्यधर्म्मेन्द्रो न तस्त्थौ समरे पथीनाम् ॥

- **दिव्यरुपां विशालाक्षीं शुचिं कुंडल धारिणीम् ।**
रक्त मुक्ता द्यलंकारां शचि मावाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः शच्यै नमः । शचीम् आवाह्यामि स्थापयामि पूजयामि ।

4. **मेधाम्**

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥

- विश्वेस्मिन् भूरिवरदां जरां निर्जर सेविताम्।
  बुध्दि प्रबोधिनीं सौम्यां मेधामावाहयाम्यहम्॥
- ॐ भुर्भुवः स्वः मेधायै नमः मेधाम् आवाह्यामि स्थापयामि पूजयामि।

5. **सावित्रीम्**

ॐ सविता त्वा सवाना ७ सुवतामग्नि-,र्गृहपतीना ७ सोमो वनस्पतीनाम्।
बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय रुद्रः, पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम्॥

- जगत्सृष्टिकरीं धात्रीं देवीं प्रणव मातृकाम्।
  वेदगर्भां यज्ञमयीं सावित्रिं स्थामयाम्यहम्॥
- ॐ भुर्भुवः स्वः सावित्र्यै नमः। सावित्रीम् आवाह्यामि स्थापयामि पूजयामि।

6. **विजयाम्**

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ २ ऽउत।
अनेशन्नस्य या ऽइषव ऽआभुरस्य निषङ्गधिः॥

- सर्वास्त्र धारिणीं देवीं सर्वाभरण भूषिताम्।
  सर्वदेव स्तुतां वन्द्या विजयां स्थापयाम्यहम्॥
- ॐ भुर्भुवः स्वः विजयायै नमः। विजयाम् आवाह्यामि स्थापयामि पूजयामि।

7. **जयाम्**

ॐ बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः॥

- दैत्यरक्षःक्षय करीं देवानामभयप्रदां।
  गीर्वाण वंदिता देवीं जया मावाहयाम्यहम्॥
- ॐ भुर्भुवः स्वः जयायै नमः। जयाम् आवाह्यामि स्थापयामि पूजयामि।

8. **देवसेनाम्**

ॐ इन्द्र आसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।
देवसेना नामभि भञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्॥

- मयूर वाहनां देवीं खड्ग शक्ति धनुर्धराम।
  आवाहयेद् देवसेनां तारकासुरमर्दिनीम्॥
- ॐ भुर्भुवः स्वः देवसेनायै नमः। देवसेनाम् आवाह्यामि स्थापयामि पूजयामि।

9. **स्वधाम्**

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः,
पितामहेभ्यः स्वधायिभ्यः स्वधा नमः,
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः।
अक्षन् पितरोऽ मीमदन्त, पितरोती तृपन्त पितरः, पितरः शुन्धध्वम्॥

- अग्रजा सर्वदेवानां कव्यार्थं प्रतिष्ठिता।
  पितृणां तृप्तिदां देवीं स्वधा मावाहयाम्यहम्॥
- ॐ भुर्भुवः स्वः स्वधायै नमः। स्वधाम् आवाह्यामि स्थापयामि पूजयामि।

10. स्वाहाम्

ॐ स्वाहा प्राणेभ्यः साधिपतिकेभ्यः । पृथिव्यै स्वाहाग्नये स्वाहान्तरिक्षाय स्वाहा वायवे स्वाहा । दिवे स्वाहा सूर्याय स्वाहा ॥

- हविर्गृहित्वा सततं देवेभ्यो या प्रयच्छति । तां दिव्यरुपां वरदां स्वाहा मावाहयाम्यहम् ॥
- ॐ भुर्भुवः स्वः स्वाहायै नमः । स्वाहाम् आवाह्यामि स्थापयामि पूजयामि ।

11. मातृ

ॐ आपो अस्मान् मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ७ हि रिप्रं प्रवहन्ति देवीरुदिदाब्भ्यः शुचिरा पूतएमि । दीक्षातपसोस्तनूरसि तां त्वा शिवा ७ शग्मां परिदधे भद्रं वर्णम पुष्यन ॥

- आवाहयाम्यहं मातृः सकला लोक पूजिताः । सर्वकल्याण रूपिण्यो वरदा दिव्य भूषिताः ॥
- ॐ भुर्भुवः स्वः मातृभ्यो नमः । मातृम् आवाह्यामि स्थापयामि पूजयामि ।

12. लोकमातृ

ॐ रयिश्चमे रायश्चमे पुष्टंचमे पुष्टिश्चमे विभुचमे प्रभुचमे पूर्णंचमे पूर्णतरंचमे कुयवंचमे क्षितंचमे न्नंचमे क्षुच्चमे यज्ञेनकल्पन्ताम् ॥

- आवाहये ल्लोकमातृर्जयंतीप्रमुखाःशुभाः । नानाभीष्टप्रदाः शांता सर्वलोकहिता वहाः ॥
- ॐ भुर्भुवः स्वः लोकमातृभ्यो नमः । लोकमातृम् आ० स्थापयामि पूजयामि ।

13. धृतिम्

ॐ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु । यस्मान्न ऋते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥

- नमःस्तुष्टिकरीं देवीं लोकानुग्रहकर्मणी । स्वकामस्यच सिध्यर्थं धृतिमावाहयाम्यहं ॥
- ॐ भुर्भुवः स्वः धृत्यै नमः । धृतिम् आवाह्यामि स्थापयामि पूजयामि ।

14. पुष्टिम्

ॐ त्वाष्टा तुरीयो अभ्युत इन्द्राग्नी पुष्टिवर्धना । द्विपदा धन्दा इन्द्रियमुक्षा गौर्न वयो दधुः ॥

- आवाहयाम्यहं पुष्टि जगद्विघ्न विनाशिनी । ज्ञात्वा पुष्टि करिं देवीं रक्षणाया ध्वरे मम ॥
- ॐ भुर्भुवः स्वः पुष्ट्यै नमः । पुष्टिम् आवाह्यामि स्थापयामि पूजयामि ।

15. तुष्टिम्

ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः । सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥

- सौम्यरुपे सुवर्णाभे विद्युज्वलीतकुंडले । धर्मतुष्टिकरीं देवीं मस्मिन्यज्ञे हितायवै ॥
- ॐ भुर्भुवः स्वः तुष्ट्यै नमः । तुष्टिम् आवाह्यामि स्थापयामि पूजयामि ।

16. **आत्मनः कुलदेवताम्**

ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा।
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा॥

- **त्वमात्मासर्व देवानां देहिनांमंत्र सर्वगां।**
  वंशवृध्दि करीं देवीं कुलदेवीं प्रपूजयेत्॥
- ॐ भुर्भुवः स्वः आत्मनः कुलदेवतायै नमः आत्मनः कुलदेवताम् आ०स्था०पू०।

- प्राणप्रतिष्ठा — **ॐ मनो जूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ७ समिमं दधातु। विश्वे देवास सऽइह मादयन्तामोम्प्रतिष्ठ॥**
  - **अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरन्तु च।**
    अस्यै देवत्वम् आचार्यै मामहेति च कश्चन॥
  - गौर्याद्याः कुल देववान्त मातरो गणपति सहिताः सुप्रतिष्ठिताः वरदा भवन्तु।
- आवाहन — ॐ दारिदद्य दावानल नाशिकाः सदा, भजाम्यहं दुःख निधौ निमग्नः।
  कृपा कटाक्षं मयि मन्दबुद्धौ, मदर्थ मायान्तु निपात्य मातरः॥
- आसन — ॐ सिहासनं सुन्दर शोभनञ्च, सुसज्जितं तन्मणिभिः सुसौम्यम्।
  शिवप्रदः षोडश संख्यकाश्च, गृह्णन्तु देवासुर पूज्यमानाः॥
- पाद्य — ॐ अनेक तीर्थोपहृतानि नीराणि, आदाय गन्धान्वितमद्य पाद्यम्।
  सम्पादितं सारयुतं सुरम्यं गुह्णन्तु चोत्फुल्ल सरोज नेत्राः॥
- अर्घ — ॐ जलज चम्पक पुण्य गणान्वितं, रुचिर मर्ध्य मधन्य करस्थितम्।
  सकल सारमयं हि यदुत्तमं, कुरुत स्वीकरणं मम मातरः॥
- आचमन् — ॐ सकल गन्धयुतं सुमनोहरं, सकल रोग विनाशकरं शुभम्।
  ललित माचमनं सुख पूर्वकम्, कुरुत स्वीकृत मज्ञ सुमातरः॥
- पंचामृत स्नान — ॐ पंचविकार नाशकं दुग्धादिभिर्निर्मित मद्य सुन्दरम्।
  निःशेष पायान्तक मच्छ दर्शनं, गृह्णन्तु दासस्य सदा सुमातरः॥
- स्नान — ॐ स्नानीयचूर्ण सकलेन विराजितेन, गन्धान्वितेन कुसुमैश्च सुवासितेन।
  स्नानं विधेय मधुना रुचिरेण नीरेणात्यन्त मुग्ध हृदयेऽपि कृपा विधेय॥
- वस्त्र — ॐ कौशेय मच्छं हि सुवस्त्र मेतद् वन्धाः स्थितं वै पुरतः सुमञ्चे।
  ददामि गन्धेन युतं ममापि प्रिपञ्च कुर्वन्तु सदा पुराणाः॥
- कुंकुम् — ॐ प्रभात कालस्य रवेः समानं श्रीरक्त चूर्णम् मनसा ददामि।
  धूपादिकेनाति सुगन्धितं तद् गृह्णन्तु प्रीत्याखिल लोकवन्द्याः॥
- चंदन — ॐ गन्धं प्रकामं रचिरं सुवन्द्याः ददाम्यहं चात्र भवत् प्रियार्थम्।
  लोकैक कूपे पतितं क्वणन्तं रक्षन्तु चाज्ञान विनाशिकाः माम्॥

- **अक्षत** ॐ तण्डुलास्तु भवदर्थ मिहाद्य चार्पिता:, कुरुत वै स्वीकरणम् तथैव। पूजिता: सफल लोकसाहाय्या: सौख्यदा: पापहराश्च देव्य: ॥
- **फूल** ॐ पुष्पाणि सन्तीह सुगन्धवन्ति, चाघ्राय सानन्दतरा भवन्तु। सन्ताप युक्तं निजमद्यभक्तं, नक्तं दिवं धन्यतमा: पुनन्तु ॥
- **धूप** ॐ मनुष्य देवासुर सान्द्र सौख्यदं, लवंगपाटी रजचूर्ण संयुतम्। सद्य: सुगन्धी कृत हर्म्य कोष्ठकं, धूपं प्रियार्थं प्रददामि मातर: ॥
- **दीप** ॐ लोकान्ध कारस्य विनाशदक्षं, सद् वर्त्ति सद्पूर्त्ति युतं प्रदीपम्। प्रज्वालय सानन्द अमुं ददामि, गृह्णन्तु चाज्ञान विनाशिका मे ॥
- **नैवेद्य** ॐ पवित्रपात्रे विधिवत् प्रसारितं, सुगन्ध द्रव्यैश्च सुगन्धितं मुदा। सुधाशना: स्वीकुरुत प्रियं तथा, नैवेद्य मेतन् मनसा सुमातर: ॥
- **ताम्बुल** ॐ एला लवंग निचय रति गन्ध युक्तं, ताम्बूल मद्य हृदयेन ददामि रम्यम्। गृह्णन्तु भद्रमधिकं वितरन्तु मह्य, सह्येन लोक इह वैज्वलनं कदापि ॥
- **दक्षिणा** ॐ देवासुरैर्नित्य मशेषकाले, सुगीयमाना मम मातरश्च। गृह्णन्तु सद्य: प्रियदक्षिणां वै, ध्यायेन तथ्ये मयि वर्तितव्यम् ॥
- **नीराजन** ॐ नीराजनां षोडश संख्याका मुदा, करोमि दु:खस्य विनाशिकामहम्। अनेक पापार्दित मानवं च या, पवित्र मत्रा तनुते जगद् युगे।
- **प्रदक्षिणा** ॐ प्रदक्षिणा मद्य करोमि सद्य:, पदे-पदे दु:ख विनाश कारिणीम्। जनौघ पापस्य करोति नाशं, दासस्य या सा मुद मादधाति ॥
- **पुष्पाजंलि** ॐ ज्ञात्वा सुखं सुरुचिरं भुवने मया नो, भ्रान्तं सदापि नव योनि समुद्भवेन। शान्ति र्न चात्र विलपामि धनांधकारे, युक्त्या कयापि कलयन्तु ममापि भद्रम् ॥
- **प्रार्थना** ॐ समख्ये देव्या धिया सन दक्षिणयो रुक्षसा। माम ऽ आयु: प्रमोषीर्मो ऽ अहन्त ववीरं विदेय तवदेवि सन्दृशि ॥
  - ॐ गणेश पूर्विका देव्यो गौर्यादि प्रमुखा: स्मृता:। प्रसीदन्तु हि कण्याण्यो निर्विघ्नं कुरुताध्वरम् ॥
  - ॐ आयुरारोग्य मैश्वर्यम् ददध्वं मातरो मया। निविघ्नं सर्वकार्येषु कुरुध्वं सगणाधिपा: ॥
  - न चार्चनं पुण्यतमं शुभ प्रदम्, जानाम्यहं धन्यतमा: सुमातर:। सुरप्रिया: षोडशमातृका: मम, भूयास रज्ञान विनाश कारिका: ॥
- **अर्पण** एतानि गन्धाक्षत, पुष्प, धूप, दीप, नैवेद्य, ताम्बूल, पूंगीफल, दक्षिणा, द्रव्येण अनया पूजया प्रीयन्ताम् न मम्।

॥ सप्तस्थल मातृका पूजनम् ॥

- षोडश मातृका के बगल में ७ खाना बनाकर सप्तस्थल मातृका का आवाहन करें।

1. **ॐ ब्राह्मयै नमः** **ब्राह्मीम्** आवाह्यामि स्थापयामि पूजयामि।
2. **ॐ माहेश्वर्यै नमः** **माहेश्वरीम्** आवाह्यामि स्थापयामि पूजयामि।
3. **ॐ कौमार्यै नमः** **कौमारीम्** आवाह्यामि स्थापयामि पूजयामि।
4. **ॐ वैष्णव्यै नमः** **वैष्णवीम्** आवाह्यामि स्थापयामि पूजयामि।
5. **ॐ वाराह्यै नमः** **वाराहीम्** आवाह्यामि स्थापयामि पूजयामि।
6. **ॐ इन्द्राण्यै नमः** **इन्द्राणीम्** आवाह्यामि स्थापयामि पूजयामि।
7. **ॐ चामुण्डायै नमः** **चामुण्डाम्** आवाह्यामि स्थापयामि पूजयामि।

- प्राणप्रतिष्ठा **ॐ मनो जूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ७ समिमं दधातु। विश्वे देवास सऽइह मादयन्तामोम्प्रतिष्ठ॥**
  - **अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरन्तु च। अस्यै देवत्वम् आचार्यै मामहेति च कश्चन॥**
  - सप्तस्थल मातृका सुप्रतिष्ठिताः वरदा भवन्तु।

- सप्तस्थल मातृकाओं का पंचोपचार या षोडशोपचार पूजा कर दे। **पृष्ठ क्र. 00** देखें।

- अर्पण एतानि गन्धाक्षत, पुष्प, धूप, दीप, नैवेद्य, ताम्बूल, पूंगीफल, दक्षिणा, द्रव्येण अनया पूजया प्रीयन्ताम् न मम्।
  - ॐ क्षेमकर्त्री, तुष्टिकर्त्री, पुष्टिकर्त्री, वरदात्री भव।

॥ सप्तघृत मातृका (वसोर्धारा) पूजनम् ॥

- षोडश मातृका एवं सप्तघृत मातृका के बगल में सफेद कपड़े पर २८ बिन्दु बनाकर आवाहन करें।

श्रीर्लक्ष्मीर्धृतिर्मेधा स्वाहा प्रज्ञा सरस्वती।
माग्ङल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः॥

1. **श्रीयम्**
2. **लक्ष्मीम्**
3. **धृतिम्**
4. **मेधाम्**
5. **स्वाहाम्**
6. **प्रज्ञाम्**
7. **सरस्वतीम्**

- ॐ भूभुर्वः स्वः सप्तघृत मातृका मण्डल देवताभ्यो नमः। आवाहयामि, स्थापयामि, पूजयामि।

1. **श्रीयम्**

ॐ मनसः काममाकुतिं वाचः सत्यमशीमहि।
पशूनां ७ रूपमन्नस्य रसो यशः श्रीः श्रयतां मयि स्वाहा॥

- **ॐ सुवर्णाभां पद्महस्तां विष्णोर्वक्षस्थल स्थितां।**
त्र्यैलोक्यवल्लभां देवी श्रियमावा हयाम्यहं॥
- ॐ भुर्भुवः स्वः श्रियै नमः। श्रियम् आवाह्यामि, स्थापयामि, पूजयामि।

2. **लक्ष्मीम्**

ॐश्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम।
ईष्णन्निषाण मुं मइषाण सर्वलोकम् मइषाण॥

- **ॐ शुभ लक्षण संपन्नां क्षीरसागर संभवां।**
चंद्रस्यभगिनींसौम्यां लक्ष्मीमावाहयाम्यहं॥
- ॐ भुर्भुवः स्वः लक्ष्म्यै नमः। लक्ष्मीम् आवाह्यामि, स्थापयामि, पूजयामि।

3. **धृतिम्**

ॐ भद्रं कर्णेभिः श्रृणुयाम देवाः। भद्रं पश्येमाक्षभिर्य्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवां ७ सस्तनूभिर्व्यशेमहि देवहितं यदायुः॥

- **ॐ संसारधारणपरां धैर्य लक्षण संयुताम्।**
सर्वसिद्धि करीं देवीं धृति मावाहयाम्यहं॥
- ॐ भुर्भुवः स्वः धृत्यै नमः। धृतिम् आवाह्यामि, स्थापयामि, पूजयामि।

4. **मेधाम्**

ॐ मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा॥

- **ॐ सदसत्कार्यकरणंक्षमाबुद्धिविलासिनी।**
मम कार्ये शुभकरी मेधा मावाहयाम्यहं॥
- ॐ भुर्भुवः स्वः मेधायै नमः। मेधाम् आवाह्यामि, स्थापयामि, पूजयामि।

5. **स्वाहाम्** **ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा।**
चक्षुषे स्वाहा श्रोत्राय स्वाहा वाचे स्वाहा मनसे स्वाहा॥

- **ॐ सौम्यरुपांसुवर्णाभां विद्युज्वलित कुंडलाम्।**
जननीं पुष्टि करीणीं पुष्टिं मावा हयाम्यहं॥
- ॐ भुर्भुवः स्वः स्वाहायै नमः। स्वाहाम् आवाह्यामि, स्थापयामि, पूजयामि।

6. **प्रज्ञाम्** **ॐ आयं गौः पृश्रीरक्रमीदसदन् मातरं पुरः। पितरं च प्रयन्त्स्वः॥**

- **ॐ भूतग्राम मिदंसर्व मजेन श्रद्धयाकृतम्।**
श्रद्धयाप्राप्यते सत्यं श्रद्धा मावाहयाम्यहं॥
- ॐ भुर्भुवः स्वः प्रज्ञायै नमः। प्रज्ञम् आवाह्यामि, स्थापयामि, पूजयामि।

7. **सरस्वतीम्** **ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः॥**

- **ॐ प्रणवस्यैव जननीं रसना ग्रस्थिता सदा।**
प्रगल्भ दात्रि चपलां वाणीं मावाहयाम्यहं॥
- ॐ भुर्भुवः स्वः सरस्वत्यै नमः। सरस्वतीम् आवाह्यामि, स्थापयामि, पूजयामि।

- सभी बिन्दुओं पर घी की धारा बारी-बारी से दे।
  - घृतधारा **ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्र धारम्।**
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥
  - **ॐ नमोस्तु वसु-मातृभ्यो घृत-मातृभ्य एव च।**
कर्मण्यस्मिन् सिद्ध्यर्थं धारां दास्यामि मातरः॥

- बतासा या गुड के टुकड़े से सातों धाराओं को मिला दे।
  - धारा एकीकरण **श्री पूवम् सप्तमातृश्च घृतमातृस्तथैव च।**
गुडेन मेलयिष्यामि ताः सर्वार्थ प्रसाधिकाः॥
  - प्राणप्रतिष्ठा **ॐ मनो जूतिर्जुषता माज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ७ समिमं दधातु। विश्वे देवास सऽइह मादयन्तामोम्प्रतिष्ठ॥**
  - **अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरन्तु च।**
अस्यै देवत्वम् आचार्यै मामहेति च कश्चन॥
  - सप्तघृत मातृका सुप्रतिष्ठिताः वरदा भवन्तु।

- सप्तघृत मातृकाओं का पंचोपचार या षोडशोपचार पूजा कर दे। **पृष्ठ क्र. 00** देखें।
- अर्पण एतानि गन्धाक्षत, पुष्प, धूप, दीप, नैवेद्य, ताम्बूल, पूंगीफल, दक्षिणा, द्रव्येण अनया पूजया वसोर्धारा देवता प्रीयन्ताम् न मम्।

॥ आयुष्य मंत्र ॥

- यदायुष्यं चिरं देवाः सप्तकल्पान्तजीविषु ।
  दुस्तेनायुषा युक्ता जीवेम शरदः शतम् ॥ ॥ १ ॥
- दीर्घा नागा नगा नद्योऽनन्ताः सप्तार्णवा दिशः ।
  अनन्तेनायुषा तेन जीवेम शरदः शतम् ॥ ॥ २ ॥
- सत्यानि पञ्चभूतानि विनाश रहितानि च ।
  अविनाश्या युषा तद्वज्जीवेम शरदः शतम् ॥ ॥ ३ ॥
- ॐ आयुष्यं वर्चस्य ७ रायस्पोष मौद्भिदम् ।
  इदं ७ हिरण्यं वर्चस्व जैत्राया विशत दुमाम् ॥ ॥ ४ ॥
- ॐ न तद् रक्षां ७ सि न पिशाचास्तरन्ति देवानाभोजः ।
  प्रथम ज ७ ह्येतत् । यो विभर्ति दाक्षायण ७ हिरण्य ७ ।
  स देवेषु कृणुते दीर्घमायुः । स मनुष्ये षु कृणुते दीर्घमायुः ॥ ॥ ५ ॥
- ॐ यदावध्नन् दाक्षायणा हिरण्य ७ शतानीकाय सुमनस्यमानाः ।
  तन्य आवघ्नामि शत शारदा यायुष्मान् जरदष्टिर्यथासम् ॥ ॥ ६ ॥

॥ आभ्युदयिक नान्दीमुख श्राद्धम् ॥

न स्वधाशर्मवर्मेति पितृनाम च चोच्चरेत् ।
न कर्म पितृतीर्थेन न कुशा द्विगुणीकृताः ॥
न तिलैर्नापसव्येन पित्र्यमन्त्र विवर्जितम् ।
अस्मच्छब्दं न कुर्वीत श्राद्धे नान्दीमुखे क्वचित् ॥

आचम्य प्राणानायम्य पवित्र धारणं के उपरान्त आभ्युदयिक नान्दीमुख षोडशमातृका के समक्ष पूर्वाभिमुख सव्य रहकर ही पितरों की अर्चना करने का विधान है।

- **संकल्प:** ॐ तत्सदद्य मासोत्तमे अमुक मासे, अमुक पक्षे, अमुक तिथौ, अमुक वासरे, अमुक कर्मांग भूतं आभ्युदयिक नान्दी श्राद्ध अहं करिष्ये।

- **पाद-प्रक्षालनम्** पाद-प्रक्षालन हेतु आसन पर जल छोड़े।

1. **ॐ सत्यवसु संज्ञका: विश्वेदेवा: नांदिमुख: ।**
   - ॐ भूर्भुव: स्व: वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दि: ।
2. **ॐ मातृ-पितामहि-प्रपितामह्य: नांदिमुख्य: ।**
   - ॐ भूर्भुव: स्व: इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दि: ।
3. **ॐ पितृ-पितामह-प्रपितामहा: नांदिमुखा: ।**
   - ॐ भूर्भुव: स्व: इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दि: ।
4. **ॐ मातामह-प्रमातामह-वृद्धप्रमातामहा: सपत्निका: नांदिमुखा: ।**
   - ॐ भूर्भुव: स्व: इदं वः पाद्यं पादावनेजनं पाद प्रक्षालनं वृध्दि: ।

- **आसनदानम्** विश्वेदेवा तथा सभी पूर्तों के लिए आसन दें।

1. **ॐ सत्यवसु संज्ञका विश्वेदेवाः नान्दिमुखाः भूर्भुवः स्वः इदम् आसनं वो नमः ।**
   - नांदिश्राद्धे क्षणौ क्रियेताम् यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥
2. **ॐ मातृ-पितामहि-प्रपितामह्यः नान्दिमुख्यः भूर्भुवः स्वः इदम् आसनं वो नमः ।**
   - नांदिश्राद्धे क्षणौ क्रियेताम् यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥
3. **ॐ पितृ-पितामह-प्रपितामहाः नान्दिमुखाः भूर्भुवः स्वः इदम् आसनं वो नमः ।**
   - नांदिश्राद्धे क्षणौ क्रियेताम् यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥
4. **ॐ मातामह-प्रमातामह-वृद्धप्रमातामहाः सपत्नीकाः नान्दिमुखाः भूर्भुवः स्वः इदम् आसनं वो नमः ।**
   - नांदिश्राद्धे क्षणौ क्रियेताम् यथा प्राप्नुवन्तो भवन्तः तथा प्राप्नुवामः ॥

- **जलाऽक्षत पुष्प प्रदानम्** जल, पुष्प, चावल सभी आसनों पर चढायें।

1. जल चढ़ावे **ॐ शिवा आप: सन्तु।**
2. चन्दन चढ़ावे **ॐ गन्धा: पान्तु।**
3. अक्षत चढ़ावे **ॐ अक्षतं चारिष्ट मस्तु।**
4. फूल चढ़ावे **ॐ सौमनस्य मस्तु।**

- **गन्धाद्यर्चन हेतु ४ बार जल छोड़े।**

1. **ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥
2. **ॐ मातृ-पितामहि-प्रपितामह्य: नांदिमुख्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥
3. **ॐ पितृ-पितामह-प्रपितामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥
4. **ॐ मातामह-प्रमातामह-वृद्धप्रमातामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव:स्व: इदं गंधाद्यर्चन: स्वाहा संपद्यतां वृद्धि: ॥

- **भोजन निष्क्रय दानम्** भोजन निष्क्रय निमित्त दक्षिणा दें।

1. **ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: इदं भोजन निष्क्रयभुतं द्रव्यम्-अमृत-रुपेण स्वाहा सम्पद्यतां वृद्धि:॥
2. **ॐ मातृ-पितामहि-प्रपितामहिभ्य: नांदिमुखिभ्य:।**
   - ॐ भूर्भुव: स्व: इदं भोजन निष्क्रयभुतं द्रव्यम्-अमृत-रुपेण स्वाहा सम्पद्यतां वृद्धि:॥
3. **ॐ पितृ-पितामह-प्रपितामहेभ्य नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: इदं भोजन निष्क्रयभुतं द्रव्यम्-अमृत-रुपेण स्वाहा सम्पद्यतां वृद्धि:॥
4. **ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: इदं भोजन निष्क्रयभुतं द्रव्यम्-अमृत-रुपेण स्वाहा सम्पद्यतां वृद्धि:॥

- **सक्षिर यव जलानि दद्यात** दुध, जव, जल मिलाकर अर्पण करें।

1. **ॐ सत्यवसु संज्ञका: विश्वेदेवा: नांदिमुखा:।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥
2. **ॐ मातृ-पितामहि-प्रपिताहिभ्य: नांदिमुखिभ्य:।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥
3. **ॐ पितृ-पितामह-प्रपितामहा: नांदिमुखा:।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥
4. **ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहा: सपत्नीका: नांदिमुखा:।** ॐ भूर्भुव:स्व:प्रीयंताम् ॥

- **जलधारा दानम्** पितरों के लिए अँगुठे की ओर से पूर्वाग्र जलधारा दें।
  - यजमान कहे **ॐ अघोरा: पितर: सन्तु:।**
  - ब्राह्मण कहे **सन्त्वघोरा: पितर:।**

- **आशिष ग्रहणम्** यजमान हाथ जोड़कर प्राथना करें। ब्राह्मण कहें।
  - **गोत्रंन्नोभि वर्धंतां। अभिवर्धंतांवो गोत्रम्॥**
  - **दातारोनोभि वर्धंतां। अभिवर्धंतांवो दातार:॥**
  - **संततिर्नोभि वर्धंतां। अभिवर्धंतांव:संतति:॥**
  - **श्रद्धाचनोमाव्यगमत। माव्यगमत्श्रद्धा॥**
  - **अन्नचनोबहुभवेत्। भवतुवोबह्वन्नम्॥**
  - **अतिथिंश्चलभेमहि। लभतांवोतिथय:॥**
  - **वेदाश्चनोभि वर्धंतां। अभिवर्धंतावो वेदा:॥**
  - **मायाचिष्मकंचन। मायाचध्वं कंचन॥**
  - **एता:आशिष:सत्या:संन्तु। सन्त्वेता: सत्या: आशिष:॥**

- **दक्षिणा दान संकल्प** मुन्नका, आँवला, यव, अदरक, मूल, तथा दक्षिणा लेकर।

1. **ॐ सत्यवसु संज्ञकेभ्यो विश्वेभ्यो देवेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥
2. **ॐ मातृ-पितामहि-प्रपितामहिभ्य: नांदिमुखिभ्य:।**
   - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥
3. **ॐ पितृ-पितामह-प्रपितामहेभ्य: नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥
4. **ॐ मातामह-प्रमातामह-वृद्ध प्रमातामहेभ्य: सपत्निकेभ्यो नांदिमुखेभ्य:।**
   - ॐ भूर्भुव: स्व: कृतस्य नांदिश्राद्धस्य फलप्रतिष्ठा सिध्यर्थं द्राक्षामलक यवमुल फल निष्क्रयिणिं दक्षिणां दातुमह मुत्सृजे॥

- सीधा दान संकल्प **अद्य मयाचरितस्य अमुक कर्मण: कर्मागंत्वेन नान्दीश्राद्ध नैमित्तकेन च ब्राह्मण भोजन पर्याप्तामान्नं तद् फल सिध्यर्थं दक्षिणां च गोत्रीय शर्मणे ब्राह्मणाय दातुमहमुत्सृजे।** कुछ लोग सीधा दान करते है।

- यजमान **ॐ उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाँ इयक्षते।**
  - **ॐ इडामग्ने पुरुद ७ स ७ सनिं गोः शश्वत्तम ७ हव मानाय साध। स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥**
  - **अनेन नांदिश्राद्धं संपन्नं।**
- ब्राह्मण **ॐ सुसंपन्न।**
- प्रार्थना **ॐ वाजे वाजेऽवत वाजिनो नो धनेषु विप्राऽअमृता ऽ ऋतज्ञाः। अस्य मद्धवः पिबत मादयद्धवं तृप्ता यात पथिभिर्देवयानैः॥**
  - **ॐ आमा वाजस्य प्रसवो जगम्या देमे द्यावा पृथिवी विश्वरूपे। आमागन्तां पितरा मातरा चामा सोमो अमृतत्वेन गम्यात्॥**
  - **विश्वेदेवाः प्रीयन्ताम्।**
  - **माता-पितामहा चैव तथैव प्रपितामही। पिता पितामहश्चैव तथैव प्रपितामहः॥**
  - **मातामहस्तत् पिता च प्रमाता महकादयः। एतेभवन्तु सुप्रीताः प्रयच्छन्तु च मंगलम्॥**
- यजमान **मया चरिते सांकल्पिक नान्दिश्राद्धे न्युनातिरिक्तो यो विधिः सः भवद् वचनात् गणपति प्रसादात् च परिपुर्णोस्तु।**
- ब्राह्मण **अस्तु परिपुर्णः॥**
- अर्पण अनेन नांदिश्राद्धाख्येन कर्मणः नंदमुख नंदपितरः प्रियंतां वृद्धिः॥

॥ आचार्य / जापक वरणम् ॥

- यजमान आचार्य का वरण करे।
- यजमान ब्राह्मण का तीन बार पाँव धो ले।
  - **ॐ आपद् घनध्वान्त सहस्रभानवः समीहितार्थार्पण कामधेनवः।**
    समस्त तीर्थाम्बु पवित्र मूर्तयो रक्षन्तु मां ब्राहाण पाद पांसवः॥
- यजमान ब्राहाण के माथे में चंदन, अक्षत लगा कर फूलमाला पहना दें।
  - **ॐ गन्ध द्वारां दुराधर्षाम् नित्य पुष्टां करीषिणीम्।**
    ईश्वरीं सर्वभूतानां तामिहो पह्वये श्रियम्॥
- ब्राह्मण प्रार्थना — **ॐ आचार्यस्तु यथा स्वर्गे शक्रा दीनां बृहस्पतिः।**
  तथा त्वं मम यज्ञेस्मिन् आचार्यो भव सुव्रत॥ ॥ १ ॥
  - **यथा चतुर्मुखो ब्रह्मा सर्वलोक पितामहः।**
    तथा त्वं मम यज्ञेस्मिन् ब्रह्माभव द्विजोत्तम्॥ ॥ २ ॥
- संकल्प - वरण — कुश, अक्षत, द्रव्य, जल, धोती, लोटा, अंगौछा, सुपारी, जनेऊ लेकर
  - **अद्य विशेषण विशिष्टायां शुभ-पुण्य-तिथौ अमुक-गोत्रः, अमुक-नामाऽहम् अस्मिन् कर्मणि शुभता सिध्यर्थम् आचार्य कर्म कर्तृत्वेन एभिः वरण सामग्रीभीः अमुक-गोत्रं, अमुक-शर्माणं त्वाम् अहं वृणे।**
- ब्राह्मण कहे — **ॐ वृतोऽस्मि।** संकल्प लेकर
- ब्राह्मण-आशिर्वाद — **व्रतेन दीक्षामाप्नोति दीक्षयाऽप्नोति दक्षिणाम्।**
